# Shri Dakshinamurtimanusuvarnamalastavah

# श्रीदक्षिणामूर्तिमनुसुवर्णमालास्तवः

## Document Information

Text title : dakShiNAmUrtimanusuvarNamAlAstavaH

File name : dakShiNAmUrtimanusuvarNamAlAstavaH.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# श्रीदक्षिणामूर्तिमनुसुवर्णमालास्तवः

ओमिति निखिला देवा यस्याज्ञां शिरसि कुर्वते सततम् ।
ओङ्कारपद्मभृङ्गं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ १॥

नत्वा यत्पदयुग्मं मूका अपि वाग्विधूतगुरवः स्युः ।
नतजनरक्षणदक्षं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ २॥

मोहमतङ्गजभेदनपञ्चास्या यत्पदाम्बुजप्रणताः ।
मोहान्धकारमिहिरं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ ३॥

भववारिधिमाशु तरेत्कुल्यामिव यत्पदाम्बुजध्यानात् ।
भगवत्पदादिरूपं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ ४॥

गतिविजितहंसगर्वं गगनमरुद्वह्निजलधरारूपम् ।
गजमुखषडास्यपूजितमनिशं प्रणमामि दक्षिणामूर्तिम् ॥ ५॥

वरयन्तेऽखिलविद्याः स्वयमेव यदङ्घ्रिपद्मनम्रजनान् ।
वनवासलोलचित्तं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ ६॥

तेन जितं जगदखिलं तेनैवात्तं समस्तभाग्यं च ।
येन त्वत्पदयुगलं पूजितमपि जातु दक्षिणामूर्ते ॥ ७॥

दमशममुखास्तु सुगुणाः प्राप्यन्ते सत्वरं यस्य ।
पादाम्बुजयुगनमनात्तमहं प्रणमामि दक्षिणामूर्तिम् ॥ ८॥

क्षितिपतयो दासाः स्युर्यत्पादपाथोजपूजकस्याशु ।
क्षितिधरशिखरावासं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ ९॥

णाणेति यन्मनुस्थं वर्णं जप्तुः समस्तपुरुषार्थाः ।
करतलमध्यगताः स्युस्तमहं प्रणमामि दक्षिणामूर्तिम् ॥ १०॥

मूर्तिं निरीक्ष्य मोहं प्राप्यागसुता पुरा तपस्तेपे ।
यस्य प्राप्त्यै सुचिरं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ ११॥

तस्याणिमादिसिद्धिर्विनैव योगं भवेन्न सन्देहः ।
तरुणेन्दुभूषितजटं यस्त्वां नमतीह दक्षिणामूर्ते ॥ १२॥

ये त्वत्पादाब्जयुगलं चित्ते सन्दधति दक्षिणामूर्ते ।
तान्मत्तवारणेन्द्रा दधति तुरङ्गाः सुवर्णशिबिकाश्च ॥ १३॥

मथितासुरसन्दोहं मानसचरमद्रिराजतनयायाः ।
मानप्रदमानमतामनिशं प्रणमामि दक्षिणामूर्तिम् ॥ १४॥

ह्यम्भोधौ लुठतां तत्पारं गन्तुं यदीयपदभक्तिः ।
संसृतिरूपे नौका तमहं प्रणमामि दक्षिणामूर्तिम् ॥ १५॥

मेधाप्रज्ञे चेटीभावं व्रजतो यदङ्घ्रिनतिकर्तुः ।
मेनासखजाकान्तं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ १६॥

धां बापूर्वां निखिलां योऽरं वारयति भक्तवृन्दस्य ।
धाम्नामपि धामत्वदमनिशं प्रणमामि दक्षिणामूर्तिम् ॥ १७॥

प्रज्ञामात्रशरीरं प्रणताघाम्भोधिकुम्भसञ्जातम् ।
प्रत्यक्षं नतविततेः सततं प्रणमामि दक्षिणामूर्तिम् ॥ १८॥

ज्ञांशीभूताञ्जीवान् भवमग्नान् ब्रह्मबोधदानेन ।
कुर्वाणं प्रविमुक्तान् सततं प्रणमामि दक्षिणामूर्तिम् ॥ १९॥

प्रत्नवचस्ततिगेयं प्रज्ञादानप्रचण्डनिजनमनम् ।
प्रणवप्रतिपाद्यतनुं सततं प्रणमामि दक्षिणामूर्तिम् ॥ २०॥

यस्यार्धवर्ष्मलाभादेवाभूत्सर्वमङ्गला गिरिजा ।
यमिवरहृदब्जनिलयं तमहं प्रणमामि दक्षिणामूर्तिम् ॥ २१॥

छत्रीभूतवटागं छन्नमविद्याऽऽख्यवाससानादिम् ।
छत्रादिनृपविभूतिदमनिशं प्रणमामि दक्षिणामूर्तिम् ॥ २२॥

स्वाहास्वधानिषेव्यं स्वाकृतिसन्तोषितागजाहृदयम् ।
स्वाहासहायतिलकं सततं प्रणमामि दक्षिणामूर्तिम् ॥ २३॥

हासाधरीकृतविधुं हालाहलशोभमानगलदेशम् ।
हारायिताहिराजं सततं प्रणमामि दक्षिणामूतिम्म् ॥ २४॥

श्रीमन्नृसिंहयतिराड्शिष्यः श्रीसच्चिदानन्दः ।
अकरोद्गुरुवरकृपया स्तोत्रं श्रीदक्षिणामूर्तेः ॥ २५॥

मनुवर्णघटितमेतत्स्तोत्रं यः पठति भक्तिसंयुक्तः ।
तस्मै वटतटवासी दद्यात्सकलाः कलास्त्वरितम् ॥ २६॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितः श्रीदक्षिणामूर्तिमनुसुवर्णमालास्तवः समाप्तः ।

Proofread by PSA Easwaran

*Shri Dakshinamurtimanusuvarnamalastavah*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*